लिटि इति किम्? कर्ता। हर्ता। धातोः इति किम्? 'ससूवांसो विशृण्विरे' (ऋ. ४.८.६) 'इम इन्द्राय सुन्विरे' (ऋ. ७. ३२. ४) अनभ्यासस्य इति किम्? 'कृष्णो नोनाव वृषभो यदीदम्' (ऋ. १. ७९. २) नोनूयतेर्नोनाव। 'समान्या मरुतः संमिमिक्षुः' (ऋ. १.१६५.१)। लिटि उसन्तः।

[६५६] द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्।

'यो जागार तमृचः कामयन्ते' (ऋ. ५.४४.१४)। 'दाति प्रियाणि' (ऋ. ४.८.३) इति॥

## सन्यङोः। (९/२३०८)

धातोरनभ्यासस्य इति वर्तते। सन्यङोः इति च षष्ठ्यन्तमेतत्। सनन्तस्य यङन्तस्य च अनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। [2]पिपक्षति। पिपतिषति। [3]अरिरिषति। [4]उन्दिदिषति। यङन्तस्य – पापच्यते। अटाट्यते। यायज्यते। अरार्यते। प्रोर्णोनूयते। अनभ्यासस्य इत्येव जुगुप्सिषते। लोलूयिषते॥

## श्लौ। (१०/२४९०)

श्लौ परतः अनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। [5]जुहोति। [6]बिभेति। [7]जिह्रेति॥

## चङि। (११/२३१८)

चङि परतो[8]ऽनभ्यासस्य धातोरवयवस्य प्रथमस्य एकाचो द्वितीयस्य वा यथायोगं द्वे भवतः। अपीपचत्। अपीपठत्। आटिटत्। [9]आशिशत्। [10]आर्दिदत्। पचादीनां ण्यन्तानां चङि[11]कृते णिलोपः, उपधाह्रस्वत्वं, द्विर्वचनम् [12]इत्येषां कार्याणां प्रवृत्तिक्रमः। तथा च सन्वल्लघुनि चङ्परे (७.४.९३/२३१६) इति सन्वद्भावो विधीयमानो ह्रस्वस्य स्थानिवद्भावान्न प्रतिषिध्यते। यो ह्यनादिष्टादचः पूर्वः तस्य विधिं प्रति स्थानिवद्भावो भवति[13]। न चास्मिन् कार्याणां [14]क्रमेणानिष्टादचः पूर्वोऽभ्यासो भवति इति। आटिटत् इति [15]'द्विर्वचनेऽचि' (१.१.५९/२२४३) इति स्थानिवद्भावात् द्वितीयस्यैकाचः द्विर्वचनं भवति॥

## दाश्वान् साह्वान् मीढ्वांश्च। (१२/३६२९)

दाश्वान् साह्वान् मीढ्वान् इत्येते शब्दाः छन्दसि भाषायां च अविशेषेण निपात्यन्ते। दाश्वान् इति 'दाशृ दाने' (धा.पा. ८८३) इत्येतस्य धातोः क्वसौ अद्विर्वचनम् अनिट्त्वं च निपात्यते। '[16]दाश्वांसो दाशुषः [17]सुतम्'

---

1. सामान्या ब.क.फ. 2. यियक्षति फ. 3. अतितिषति ड.फ. 4. उज्जिजिषति फ. 5. जिहीते फ.ह. 6. बिभेति नास्ति फ. 7. जिह्रेति नास्ति ह. 8. अनभ्यासस्य नास्ति क. 9. आशिशत् नास्ति फ, आशिशयत् क. 10. आर्चिचत् ब. 11. कृते नास्ति ग. 12. इति कार्याणां क.ह. 13. आटिटत् इत्यत्र पूर्वेऽभ्यासो न भवति इत्यधिकम् क.फ.ह. 14. क्रमेण नास्ति फ. 15. च इत्यधिकम् क. 16. दाश्वान् सोममिन्द्राय क. 17. सुतः ह.